# Sandhya Prayogah

# સન્ધ્યાપ્રયોગઃ

## Document Information

Text title : Sandhya Prayogah

File name : sandhyAprayogaH.itx

Category : major_works, pUjA

Location : doc_z_misc_major_works

Proofread by : Paresh Panditrao, NA, KS Sheshadri Sharma

Latest update : December 24, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# સન્ધ્યાપ્રયોગઃ

અથ સન્ધ્યાપ્રયોગઃ(૧) ।

યથોક્તસ્નાનાનન્તરં શ્વેતં અસ્યૂતારજકધૌતં વસ્ત્રં(૨) પરિધાય ઉપવસ્ત્રં(૩) ગૃહીત્વા કુશાદિવિહિતાસને(૪) પ્રાઙ્મુખ(૫) ઉપવિશ્ય પવિત્રપાણિઃ(૬) પુણ્યદેશે(૭) સન્ધ્યોપાસનમારભેત, તત્રાદૌ યજ્ઞીયભસ્મ તીર્થમૃદો વા ગૃહીત્વા જલમિશ્રણાનન્તરં "ૐ ત્ર્યમ્બકં યજામહે સુગન્ધિમ્પુષ્ટિવર્દ્ધનમ્ । ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય મામૃતાત્" (ઇતિ મર્દયિત્વા) "ૐ નમઃ શિવાય" ઇત્યભિમન્ત્ર્ય તિલકં(૮) કુર્યાત્તત્ર મન્ત્રઃ - ૐ ત્ર્યાયુષં જમદગ્નેઃ ઇતિ લલાટે, ૐ કશ્યપસ્ય ત્ર્યાયુષં ઇતિ ગ્રીવાયામ્, ૐ યદ્દેવેષુ ત્ર્યાયુષં ઇતિ બાહુમૂલે, ૐ તન્નોઽસ્તુ ત્ર્યાયુષં ઇતિ હૃદયે ।

વિષ્ણુસ્મરણમ્ -

અપવિત્રઃ પવિત્રો વેત્યસ્ય વામદેવ ઋષિઃ મુખે વિષ્ણુર્દેવતા ગાયત્રીછન્દઃ પવિત્રકરણે વિનિયોગઃ ॥

ૐ અપવિત્રઃ પવિત્રો વા સર્વાવસ્થાં ગતોઽપિ વા ।
યઃ સ્મરેત્પુણ્ડરીકાક્ષં સ બાહ્યાભ્યન્તરઃ શુચિઃ ॥

(અનેન મન્ત્રેણ વિષ્ણું સ્મૃત્વા કિઞ્ચિજ્જલં શિરસિ સિઞ્ચેત્) ॥

આચમનમ્(૯) - ૐ ઋગ્વેદાય સ્વાહા, ૐ યજુર્વેદાય સ્વાહા, ૐ સામવેદાય સ્વાહા (ઇતિ ત્રિભિર્મન્ત્રૈઃ બ્રહ્મતીર્થેન જલં ત્રિરાચમ્ય) ૐ અથર્વવેદાય નમઃ (ઇતિ કરૌ પ્રક્ષાલ્ય દક્ષિણકર્ણં સ્પૃશેત્) ॥

શિખાબન્ધનમ્(૧૦) - પ્રણવવ્યાહૃતિગાયત્ર્યા ૐ બ્રહ્મવાક્યસહસ્રેણ શિવવાક્યશતેન ચ । વિષ્ણોર્નામસહસ્રેણ શિખાગ્રન્થિં કરોમ્યહમ્ ॥ (ઇત્યનેન વા બધ્નીયાત્, બદ્ધાયાં કેવલં સંસ્પૃશેદેવ ॥)

ખસ્પર્શઃ(૧૧) - ૐ વિષ્ણુર્વિષ્ણુર્વિષ્ણુઃ (ઇતિ પઠિત્વા) ૐ વાગ્વાક્ (૧૨) ૐ પ્રાણઃ પ્રાણઃ(૧૩) ૐ ચક્ષુશ્ચક્ષુઃ ૐ શ્રોત્રં શ્રોત્રં ૐ નાભિઃ ૐ હૃદયં ૐ કણ્ઠઃ ૐ લલાટં ૐ શિરઃ ૐ શિખા ૐ બાહુભ્યાં(૧૪) યશોબલમ્(૧૫) ।

(ઇતીન્દ્રિયાદ્યાયતનાનિ જલાર્દ્રદક્ષિણકરસ્ય મધ્યમાનામિકાભ્યાં સંસ્પૃશેત્) ॥

અભિષેચનમ્(૧૬) - ૐ ૐ પુનાતુ, ૐ ભૂઃ પુનાતુ, ૐ ભુવઃ પુનાતુ, ૐ સ્વઃ પુનાતુ, ૐ મહઃ પુનાતુ, ૐ જનઃ પુનાતુ, ૐ તપઃ પુનાતુ, ૐ સત્યં પુનાતુ, ૐ તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ ધિયો યો નઃ પ્રચોદયાત્ । ૐ સર્વં પુનાતુ (વામકરે(૧૭) જલમાદાય દક્ષિણાનામિકયા પ્રતિમન્ત્રં જલે મૂર્દ્ધાનમભિષિઞ્ચેત્) ॥

આસનોપવેશનમ્ - ૐ પૃથ્વીતિ મન્ત્રસ્ય મેરુપૃષ્ઠ ઋષિઃ સુતલં છન્દઃ કૂર્મો દેવતા આસનોપવેશને વિનિયોગઃ । ૐ પૃથ્વિ ત્વયા ધૃતા લોકા દેવિ ત્વં વિષ્ણુના ધૃતા । ત્વં ચ ધારય માં દેવિ પવિત્રં કુરુ ચાસનમ્ । (ઇતિ

મન્ત્રેણ દક્ષિણહસ્તસ્ય મધ્યમાનામિકાભ્યાં આસનોપરિ કિઞ્ચિજ્જલં ક્ષિપેત્) ૐ અપસર્પન્તુ તે ભૂતા યે ભૂતા ભૂમિસંસ્થિતાઃ । યે ભૂતા વિઘ્નકર્તારસ્તે નશ્યન્તુ શિવાજ્ઞયા (ઇતિ વામપાદપાર્ષ્ણિના ત્રિવારં ભૂમિં તાડયિત્વા ભૂતાન્યુત્સાર્યાણિ) ॥

શ્રી ભૈરવનમસ્કારઃ - ૐ તીક્ષ્ણદંષ્ટ્ર મહાકાય કલ્પાન્તદહનોપમ । ભૈરવાય નમસ્તુભ્યમનુજ્ઞાં દાતુમર્હસિ । (ઇત્યનેન મન્ત્રેણ શ્રીમહાભૈરવં નમસ્કૃત્ય સઙ્કલ્પં કુર્યાત્) ॥

અથ સઙ્કલ્પઃ(૧૮) - દક્ષિણકરે જલમાદાય, ૐ તત્સદદ્યૈતસ્ય બ્રહ્મણોઽહ્નિ દ્વિતીયપરાર્દ્ધે શ્રીશ્વેતવારાહકલ્પે વૈવસ્વતમન્વન્તરે અષ્ટાવિંશતિતમે કલિયુગે કલિ-પ્રથમચરણે અનન્તકોટિબ્રહ્માણ્ડાભ્યન્તરે અસ્મિન્ બ્રહ્માણ્ડે જમ્બૂદ્વીપે ભારતખણ્ડે આર્યાવર્તૈકદેશાન્તર્ગતે પુણ્યક્ષેત્રે અમુકદેશે ષષ્ટ્યબ્દાનાં મધ્યે અમુકસંવત્સરે અમુકઋતૌ અમુકમાસે અમુકપક્ષે અમુકતિથૌ અમુકવાસરે અમુકગોત્રોત્પન્નોઽમુકશર્માહં(૧૯) મમોપાત્તદુરિતક્ષયપૂર્વકબ્રહ્મવર્ચસકામાર્થં શ્રીપરમેશ્વરપ્રીતયે પ્રાતઃ(૨૦) સન્ધ્યોપાસનં કરિષ્યે (ઇતિ સઙ્કલ્પ્ય ભૂમૌ તજ્જલં ક્ષિપેત્) ॥

અથ પુનરાચમનમ્ - ૐ અઘમર્ષણસૂક્તસ્યાઘમર્ષણઋષિરનુષ્ટુપ્ છન્દો ભાવવૃતો દેવતા અશ્વમેધાવભૃથે વિનિયોગઃ ॥ ૐ ઋતઞ્ચ સત્યઞ્ચાભીદ્ધાત્તપસોધ્યજાયત તતો રાત્ર્યજાયત તતઃ સમુદ્રો અર્ણવઃ, સમુદ્રાદર્ણવાદધિ સંવત્સરો અજાયત, અહોરાત્રાણિ વિદધદ્વિશ્વસ્ય મિષતો વશી, સૂર્યાચન્દ્રમસૌ ધાતા યથાપૂર્વમકલ્પયત્ દિવઞ્ચ પૃથિવીં ચાન્તરિક્ષમથો સ્વઃ ।

અથ કરન્યાસઃ(૨૧) - ૐ ભૂઃ અઙ્ગુષ્ઠાભ્યાં(૨૨) નમઃ । ૐ ભુવઃ તર્જનીભ્યાં(૨૩) નમઃ । ૐ સ્વઃ મધ્યમાભ્યાં(૨૪) નમઃ । ૐ તત્સવિતુર્વરેણ્યમ્ । અનામિકાભ્યાં(૨૫) નમઃ । ૐ ભર્ગો દેવસ્ય ધીમહિ કનિષ્ઠિકાભ્યાં(૨૬) નમઃ । ૐ ધિયો યો નઃ પ્રચોદયાત્ કરતલકરપૃષ્ઠાભ્યાં(૨૭) નમઃ ॥

અથ ષડઙ્ગન્યાસઃ(૨૮) નમઃ । ૐ ભૂઃ હૃદયાય(૨૯) નમઃ । ૐ ભુવઃ શિરસે(૩૦) સ્વાહા । ૐ સ્વઃ શિખાયૈ વષટ્(૩૧) । ૐ તત્સવિતુર્વરેણ્યં કવચાય(૩૨) હું । ૐ ભર્ગો દેવસ્ય ધીમહિ નેત્રત્રયાય(૩૩) વૌષટ્ । ૐ ધિયો યો નઃ પ્રચોદયાત્ અસ્ત્રાય(૩૪) ફટ્ ।

અથ પ્રણવન્યાસઃ - ૐ “અ” કારં નાભૌ । ૐ “ઉ” કારં હૃદયે । ૐ “મ” કારં મૂર્ધનિ ॥

અથ સન્ધ્યાપ્રયોગઃ ટિપ્પણિકા ।

Footnotes for starting of sandhyAprayogaH

(૧)- સમ્યગ્ ધ્યાયન્તિ સમ્યગ્ ધ્યાયતે વા પરબ્રહ્મ યસ્યાં સા સન્ધ્યા દ્વિતીયોઽર્થસ્તુ - સન્ધીયતે પરબ્રહ્મ સા સન્ધ્યા સદ્ભિરુચ્યતે ॥ (સમદર્શી) । અહોરાત્રસ્ય યા સન્ધિઃ સૂર્યનક્ષત્રવર્જિતા । સા તુ સન્ધ્યા સમાખ્યાતા મુનિભિસ્તત્ત્વદર્શિભિઃ । “અહરહઃ સન્ધ્યામુપાસીત” (તૈ. બ્રા.) । શક્તિમાનુદિતે કાલે સ્નાનં સન્ધ્યાં ન હાપયેત્ ઇતિ વ્યાસઃ । ઉત્તમા તારકોપેતા મધ્યમા લુપ્તતારકા । અધમા ભાસ્કરોપેતા પ્રાતઃ સન્ધ્યા ત્રિધા મતા । ઉત્તમા ભાસ્કરોપેતા મધ્યમા લુપ્તભાસ્કરા । અધમા તારકોપેતા સાયં સન્ધ્યા ત્રિધા મતા । અધ્યર્ધં યામાદા(?) સાયં સન્ધ્યા માધ્યાહ્નિકીષ્યતે । (ધ. સિં. સા.) । ગૌણકાલઃ - ઉદયાસ્તમયાદૂર્ધ્વં યાવત્સ્યાદ્ઘટિકાત્રયમ્ । તાવત્સન્ધ્યામુપાસીત પ્રાયશ્ચિત્તમતઃ પરમ્ ॥ (સ્કાન્દે) સ્વકાલે સેવિતા નિત્યં સન્ધ્યા કામદુધા ભવેત્ । અકાલે સેવિતા સા ચ સન્ધ્યા

વન્ધ્યા વધૂરિવ । (વિશ્વા.) । મુખ્યકાલે યદાવશ્યં કર્મ કર્ત્તું ન શક્યતે । ગૌણકાલેઽપિ કર્તવ્યં ગૌણોઽપ્યત્રેદૃશો મતઃ । (ગોભિલઃ) । ગૌણોઽપ્યતિક્રમ્ય આસાયં પ્રાતઃ સન્ધ્યાં કુર્યાદિતિ કેચિત્ ।

(૨)- સ્નાત્વૈવં વાસસી ધૌતે અક્લિન્ને પરિધાપયેત્ । અભાવે ધૌતવસ્ત્રસ્ય પટ્ટક્ષૌમાદિકાનિ ચ । કુતપં યોગપટ્ટં વા વિવાસા યેન નો ભવેત્ । (ના. દે.) । આર્દ્રવાસાસ્તુ યઃ કુર્યાજ્જપહોમપરિગ્રહાન્ । સર્વં તદ્રાક્ષસં વિદ્યાત્કર્મજાતઞ્ચ યત્કૃતમ્ । યજ્જલે શુષ્કવસ્ત્રેણ સ્થલે ચૈવાર્દ્રવાસસા । જપો હોમસ્તથા દાનં તત્સર્વં નિષ્ફલં ભવેત્ । ન સ્યૂતેન ન દગ્વેન પારક્યેણ વિશેષતઃ । મૂષકોત્કીર્ણજીર્ણેન કર્મ કુર્યાદ્વિચક્ષણઃ । (આપસ્તમ્બઃ) ।

(૩)- હોમદેવાર્ચનાદ્યાસુ ક્રિયાસુ પઠને તથા । નૈકવસ્ત્રઃ પ્રવર્તેત દ્વિજો નાચમને જપે । (વિ. પુ.) । (ના પુરુષ ઇત્યર્થઃ) ।

(૪)- કામ્યાર્થં કમ્બલઞ્ચૈવ શ્રેષ્ઠઞ્ચ રક્તકમ્બલમ્ । કૃષ્ણાજિને જ્ઞાનસિદ્ધિર્મોક્ષસ્તુ વ્યાઘ્ર ચર્મણિ । કુશાસને મન્ત્રસિદ્ધિર્નાત્ર કાર્યા વિચારણા । ધરણ્યાં દુઃખસમ્ભૂતિર્દૌર્ભાગ્યં દારુજાસને । વંશાસને દરિદ્રઃ સ્યાત્પાષાણે વ્યાધિપીડનમ્ । તૃણાસને યશોહાનિઃ પલ્લવૈશ્ચિત્તવિભ્રમઃ । જપધ્યાનતપોહાનિં કુર્વન્ વસ્ત્રાસનં તથા (વસ્ત્રાસનમત્ર કેવલ વસ્ત્રાસનં અત્ર વિશેષેઽપિ સન્ધ્યાયાં કુશાસનસ્ય મુખ્યત્વં ગ્રન્થાન્તરાદ્બોધ્યમ્) ।

(૫)- પ્રાક્ પશ્ચિમોદગાસ્યસ્તુ પ્રાતઃ સાયં નિશાસુ ચ (ઇતિ વાચસ્પતિઃ) ।

(૬)- જપે હોમે તથા દાને સ્વાધ્યાયે પિતૃતર્પણે । અશૂન્યન્તુ કર કુર્યાત્સુવર્ણરજતૈઃ કુશૈઃ । (લ. હા.) । મૂલપર્વણિ કુર્વાણો મહત્યા હીયતે શ્રિયા । મધ્યપર્વણિ કુર્વાણઃ પુત્રદારૈર્વિયુજ્યતે । અનામિકાગ્રપર્વસ્થં પવિત્રં વિભૃયાત્સદા । (શઙ્ખઃ) ।

(૭)- પુણ્યક્ષેત્રં નદીતીરં ગુહાપર્વતમસ્તકમ્ । તીર્થપ્રદેશાઃ સિન્ધૂનાં સઙ્ગમં પાવન સરઃ । ઉદ્યાનાનિ વિચિત્રાણિ બિલ્વમૂલં તટં ગિરેઃ । દેવાદ્યાયતનં કૂલં સમુદ્રસ્ય નિજં ગૃહમ્ । (શારદા) । ગૃહેષુ પ્રાકૃતી (એકગુણા) । સન્ધ્યા ગોષ્ઠે શતગુણા સ્મૃતા । નદીષુ શતસાહસ્રી અનન્તા શિવસન્નિધૌ (શાતાતપઃ) । બહિઃસન્ધ્યા દશગુણા ગોષ્ઠપ્રસ્રવણાદિષુ । ખાતતીર્થે શતગુણા સાહસ્રી જાહ્નવીતટે । (વ્યાસઃ) ।

(૮)- લલાટે તિલકં કૃત્વા સન્ધ્યાકર્મ સમાચરેત્ । અકૃત્વા ભાલતિલકં તસ્ય કર્મ નિરર્થકમ્ । (પ્ર. પા.) । અન્યચ્ચ – શ્રાદ્ધે યજ્ઞે જપે હોમે વૈશ્વદેવે સુરાર્ચને । ધૃતત્રિપુણ્ડ્રઃ પૂતાત્મા મૃત્યુઞ્જયતિ માનવઃ । (કાત્યા.) । તિલકન્તુ યજ્ઞીયભસ્મના મુખ્યં ચન્દનેન તીર્થમૃત્તિકયા વા યથાકુલાચારં લલાટાદૌ કાર્યમ્ । ભસ્માદીનામભાવે જલેનૈવ ધાર્યમિતિ શિષ્ટાઃ - “મૃદ્ભસ્મં ચન્દનં પ્રોક્તં તોયં ચૈવ ચતુર્થકમ્ ।” (પ્ર. પા.) ।

(ત્ર્યાયુષં જમદગ્નેસ્તુ લલાટે ૐ નમો નમઃ ।
કશ્યપસ્ય ત્ર્યાયુષં ચ ગ્રીવાયાં ૐ નમો નમઃ ॥ ૬૪॥

યદ્દેવેષુ ત્ર્યાયુષં ચ બાહુમૂલે નમો નમઃ ।
તન્નોઽસ્તુ ત્ર્યાયુષમિતિ હૃદિ કૃષ્ણાય તે નમઃ ॥ ૬૫॥

– લક્ષ્મીનારાયણસંહિતા/ખણ્ડઃ ૨ (ત્રેતાયુગસન્તાનઃ)/અધ્યાયઃ ૧૫૯
ત્ર્યાયુષં જમદગ્નેઃ કશ્યપસ્ય ત્ર્યાયુષમ્ ।
ત્રેધામૃતસ્ય ચક્ષણં ત્રીણ્યાયૂંષિ તેઽકરમ્ ॥ ૭॥

અથર્વવેદઃ/કાણ્ડં ૫/સૂક્તમ્ ૨૮

ત્ર્યાયુષં જમદગ્નેઃ કશ્યપસ્ય ત્ર્યાયુષમ્।

યદ્દેવેષુ ત્ર્યાયુષં તન્નોઽઅસ્તુ ત્ર્યાયુષમ્॥

-યજુર્વેદ ૩.૬૨)

(૯)- ક્રિયાં યઃ કુરુતે મોહાદનાચમ્યૈવ નાસ્તિકઃ । ભવન્તિ હિ વૃથા તસ્ય ક્રિયાઃ સર્વા ન સંશયઃ । (મ. નિ. તં.) હૃત્કણ્ઠતાલુનાભિસ્તુ શુદ્ધ્યેરન્ સ્ત્રી ચ યથાસઙ્ખ્યં દ્વિજાતયઃ । શૂદ્રશ્ચ સકૃત્સ્પૃષ્ટાભિરન્તતઃ । (યાજ્ઞવલ્ક્યઃ) ।

(૧૦)- સદોપવીતિના ભાવ્યં સદા બદ્ધશિખેન ચ । વિશિખો વ્યુપવીતશ્ચ યત્કરોતિ ન તત્કૃતમ્ । (કા. સ્મૃ.) સ્નાને દાને જપે હોમે સન્ધ્યાયાં દેવતાર્ચને । શિખાગ્રન્થિં વિના કર્મ ન કુર્યાદ્વૈ કદાચન (આહ્નિ. કા.) । ખલ્વાટાદિદોષેણ વિશિખશ્ચેન્નરો ભવેત્ । કૌશીં તદા ધારયીત બ્રહ્મગ્રન્થિયુતાં શિખામ્ ।

(૧૧)- ત્રિઃપ્રાશ્યાપો દ્વિરુન્મૃજ્ય ખાન્યદ્ભિઃ સમુપસ્પૃશેત્ (યાજ્ઞ.) । અન્યચ્ચ - અદ્ભિશ્ચ સંસ્પૃશેત્ખાનિ સર્વાણ્યપિ વિશુદ્ધયે । (વૃ. પા. સં.) ॥

(૧૨)- ઇત્યનેન ઓષ્ઠે સ્પર્શઃ ।

(૧૩)- ઇત્યનેન નાસારન્ધ્રયોઃ સ્પર્શઃ । ચક્ષુરિત્યાદિ સ્પૃષ્ટમેવ । વિશેષઃ - પ્રાણશ્ચક્ષુઃ શ્રોત્રં ઇત્યત્ર પ્રથમં દક્ષિણસ્પર્શઃ તતો વામસ્પર્શ ઇતિ વિવેકઃ ॥

(૧૪)- વામબાહું દક્ષિણસ્કન્ધે ધૃત્વા તદુપરિ દક્ષિણબાહું વામસ્કન્ધે ધારયેત્ ।

(૧૫)- નમસ્કારમુદ્રા કાર્યા ।

(૧૬)- શિરસો માર્જનં કુર્યાત્કુશૈઃ સોદકબિન્દુભિઃ । પ્રણવો ભૂર્ભુવઃ સ્વશ્ચ સાવિત્રી ચ તૃતીયિકા । અબ્દૈવત્યં ઋચં ચૈવ ચતુર્થમિતિ માર્જનમ્ । (કા. સ્મૃ.) ॥

(૧૭)- નદ્યાદૌ સત્વે વામકરે જલગ્રહણં નાવશ્યકં કુશલાભે કુશેનૈવ માર્જયેત્ ।

(૧૮)- અયં સઙ્કલ્પઃ દેશવિશેષેણ ગ્રાહ્યઃ, સઙ્કલ્પશ્ચેન્મનસિ મનનં પ્રોક્તારીત્યાઽથ, વાચાઃ વ્યાહર્તવ્યં તદનુ ચ કરેણામ્બુસેકાસ્ત્રિધેતિ । (ઋષિભટ્ટીયે) ।

(૧૯)- અત્ર ક્ષત્રિયો વૈશ્યો વા ચેત્તદા વર્મ્માહં ગુપ્તોઽહમિતિ ક્રમેણ યોજનીયમ્ ।

(૨૦)- મધ્યાહ્ને - મધ્યાહ્નમ્, સાયઙ્કાલે - સાયં ઇત્યૂહઃ કાર્યઃ ।

(૨૧)- યદ્બીજાદ્યા ભવેદ્વિદ્યા તદ્બીજેનાઙ્ગકલ્પના । અથવા મૂલમન્ત્રેણ । (તાન્ત્રિ.) ॥

(૨૨)- તર્જનીભ્યામઙ્ગુષ્ઠૌ સ્પૃશેત્ ।

(૨૩)- અઙ્ગુષ્ઠાભ્યાં તર્જન્યૌ સ્પૃશેત્ ।

(૨૪)- અઙ્ગુષ્ઠાભ્યાં મધ્યમે સ્પૃશેત્ ।

(૨૫)- અઙ્ગુષ્ઠાભ્યામનામિકે સ્પૃશેત્ ।

(૨૬)- અઙ્ગુષ્ઠાભ્યાં કનિષ્ઠિકે સ્પૃશેત્ ।

(૨૭)- દક્ષિણકરં વામકરસ્ય પરિતો ભ્રામયેત્ ।

(૨૮)- ષડઙ્ગન્યાસઃ કાર્યઃ ન વા કાર્યો ન્યાસવિધેરવૈદિકત્વાદિતિ ગૃહ્યપરિશિષ્ટે સ્પૃષ્ટં એતેનાક્ષરન્યાસપાદન્યાસાદીનાં મુદ્રાદિવિધે શાપમોચનાદિવિધેશ્ચ તાન્ત્રિકત્વેનાવૈદિકત્વાદનાવશ્યકત્વં વેદિતવ્યમ । (ધ. સિં. સા.)।

(૨૯)- દક્ષિણકરેણ હૃદયં સ્પૃશેત્ ।

(૩૦)- દક્ષિણકરેણ શિરઃ સ્પૃશેત્ ।

(૩૧)- શિખાં સ્પૃશેત્ ।

(૩૨)- વામકરં દક્ષિણસ્કન્ધે કૃત્વા દક્ષિણકરઞ્ચ તદુપરિ વામસ્કન્ધે નિવેશયેત્ ।

(૩૩)- દક્ષિણકરસ્ય તર્જનીમધ્યમાભ્યાં દક્ષિણવામનેત્રે ક્રમેણ સ્પૃશેત્ ।

(૩૪)- વામકરતલે દક્ષિણકરસ્ય તર્જનીમધ્યમાભિઃ કિઞ્ચિત્તાલં દદ્યાત્ ॥

## સન્ધ્યાધ્યાનમાવાહનઞ્ચ

પ્રાતઃ સન્ધ્યાયામ્ - (પૂર્વાભિમુખઃ) ૐ ગાયત્રીં ત્ર્યક્ષરાં બાલાં સાક્ષસૂત્રકમણ્ડલુમ્ । રક્તવસ્ત્રાં ચતુર્વક્ત્રાં હંસવાહનસંસ્થિતામ્ ॥ ઋગ્વેદકૃતોત્સઙ્ગાં રક્તમાલ્યાનુલેપનામ્ । બ્રહ્માણીં બ્રહ્મદૈવત્યાં બ્રહ્મલોકનિવાસિનીમ્ ॥ આવાહયામ્યહં દેવીમાયાન્તીં સૂર્યમણ્ડલાત્ । આગચ્છ વરદે દેવિ ત્ર્યક્ષરે બ્રહ્મવાદિનિ । ગાયત્રિ(૨)ચ્છન્દસાં માતર્બ્રહ્મયોને નમોઽસ્તુ તે ।

મધ્યાહ્નસન્ધ્યાયામ્ - (ઉદઙ્મુખઃ) ૐ સાવિત્રીં યુવતીં શુક્લાં શુક્લવસ્ત્રાં ત્રિલોચનામ્ । ત્રિશૂલિનીં વૃષારૂઢાં શ્વેતમાલ્યાનુલેપનામ્ ॥ યજુર્વેદકૃતોત્સઙ્ગાં જટામુકુટમણ્ડિતામ્ । રુદ્રાણીં રુદ્રદૈવત્યાં રુદ્રલોકનિવાસિનીમ્ ॥ આવાહયામ્યહં દેવીમાયાન્તીં સૂર્યમણ્ડલાત્ । આગચ્છ વરદે દેવિ ત્ર્યક્ષરે રુદ્રવાદિનિ ॥ સાવિત્રિ(૩)ચ્છન્દસાં માતા રુદ્રયોને નમોઽસ્તુ તે ।

સાયં સન્ધ્યાયામ્ - (પશ્ચિમાભિમુખઃ) ૐ વૃદ્ધાં સરસ્વતીં કૃષ્ણાં પીતવસ્ત્રાં ચતુર્ભુજામ્ । શઙ્ખચક્રગદાશાર્ઙ્ગહસ્તાં ગરુડવાહિનીમ્ ॥ સામવેદકૃતોત્સઙ્ગાં વનમાલાવિભૂષિતામ્ । વૈષ્ણવીં વિષ્ણુદૈવત્યાં વિષ્ણુલોકનિવાસિનીમ્ । આવાહયામ્યહં દેવીમાયાન્તીં સૂર્યમણ્ડલાત્ । આગચ્છ વરદે દેવિ ત્ર્યક્ષરે વિષ્ણુવાદિનિ । સરસ્વતિ(૪)ચ્છન્દસાં માતર્વિષ્ણુયોને નમોઽસ્તુ તે ।

પ્રાણાયામઃ(૫) - ૐકારસ્ય બ્રહ્માઋષિઃ ગાયત્રી છન્દોઽગ્નિર્દેવતા શુક્લો વર્ણઃ સર્વકર્મારમ્ભે વિનિયોગઃ । ૐ સપ્તવ્યાહૃતીનાં વિશ્વામિત્રજમદગ્નિભરદ્વાજગૌતમાત્રિવસિષ્ઠકશ્યપા ઋષયો ગાયત્ર્યુષ્ણિગનુષ્ટુબ્બૃહતીપઙ્ક્તિસ્ત્રિષ્ટુબ્જગત્યશ્છન્ દેવતાઃ અનાદિષ્ટપ્રાયશ્ચિત્તે પ્રાણાયામે વિનિયોગઃ । ૐ ગાયત્ર્યા વિશ્વામિત્રઋષિર્ગાયત્રી છન્દઃ સવિતા દેવતાગ્નિર્મુખમુપનયને પ્રાણાયામે વિનિયોગઃ । ૐ શિરસઃ પ્રજાપતિરૃષિસ્ત્રિપદા ગાયત્રી છન્દો બ્રહ્માગ્નિ-વાયુસૂર્યા દેવતા યજુઃ પ્રાણાયામે વિનિયોગઃ (ઇતિ ઋષ્યાદિકં સ્મૃત્વા) ૐ ભૂર્ભુવઃ સ્વઃ ૐ તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ ધિયો યો નઃ પ્રચોદયાત્ (ઇત્યાત્મનઃ રક્ષાર્થં સમન્તાત્ પ્રદક્ષિણવદુદકં ક્ષિપેત્તતો(૬) સ્વસ્તિકાદ્યાસનઃ સંમીલિતનયનો મૌની પ્રાણાયામત્રયં(૭) કુર્યાત્ તત્રાઙ્ગુષ્ઠેન દક્ષિણનાસાપુટં નિરુધ્ય વામનાસાપુટે વાયોરાદાનકાલે) - ૐ ભૂઃ ૐ ભુવઃ ૐ સ્વઃ ૐ મહઃ ૐ જનઃ ૐ તપઃ ૐ સત્યં ૐ

તત્સવિતુર્વરેણ્યમ્ભર્ગો દેવસ્ય ધીમહિ ધિયો યો નઃ પ્રચોદયાત્ ૐ આપો જ્યોતી રસોઽમૃતં બ્રહ્મ ભૂર્ભુવઃ સ્વરોમ્ ।
(ઇતિ જપન્નાભૌ વિષ્ણું(૮) ધ્યાયેત્ તતઃ અઙ્ગુષ્ઠાનામિકાકનિષ્ઠિકાભિર્નાસાપુટદ્વયં નિરુધ્ય વાયોર્ધારણકાલે ૐ ભૂરિત્યાદિ પઠન્ હૃદયે બ્રહ્માણં(૯) ધ્યાયેત્ । કનિષ્ઠિકાનામિકાભ્યાં વામનાસાપુટનિરોધે દક્ષિણનાસાપુટેન વાયોસ્ત્યાગ કાલે પુનરપિ ૐ ભૂરિત્યાદિ પઠંલ્લલાટે શિવં(૧૦) ધ્યાયેત્ । અનેન પ્રકારેણ એકઃ પ્રાણાયામો(૧૧) ભવતિ, એવં ત્રયઃ પ્રાણાયામાઃ પ્રતિસન્ધ્યં કાર્યાઃ) ।

અથ સન્ધ્યાપ્રયોગાન્તરે સન્ધ્યાધ્યાનમાવાહનઞ્ચ ટિપ્પણિકા ।

Footnotes for sandhyAdhyAnamAvAhana in sandhyAprayogaH

(૧)- નમસ્કારમુદ્રાં કૃત્વા મન્ત્રમુચ્ચારયન્ દેવતામાવાહયેત્ ।

(૨)- પ્રતિગ્રહાન્નદોષાચ્ચ પાતકાદુપપાતકાત્ । ગાયત્રી પ્રોચ્યતે યસ્માદ્ગાયન્તં ત્રાયતે યતઃ (વ્યાસઃ) ।

(૩)- સવિતૃદ્યોતનાત્સૈવ સાવિત્રી પરિકીર્તિતા । જગતઃ પ્રસવિતૃત્વાત્ વાગ્રૂપત્વાત્સરસ્વતી । (વ્યાસઃ) । ગાયત્રી નામ પૂર્વાહ્ણે સાવિત્રી મધ્યમે દિને । સરસ્વતી ચ સાયાહ્ને એવં સન્ધ્યા ત્રિધા સ્મૃતા । (વ્યાસઃ) । ગાયત્રી તુ સાઙ્ખ્યાયનસગોત્રમ્ । સાવિત્રી તુ કાત્યાયનગોત્રમ્ । તથા સરસ્વતી તુ બાહુલ્યગોત્રમ્ ।

(૪)- વાગ્રૂપત્વાત્સરસ્વતી । (વ્યાસઃ) ।

(૫)- પ્રાણાયામૈર્વિના યદ્યત્કૃતં કર્મ નિરર્થકમ્ । અતો યત્નેન કર્તવ્યઃ પ્રાણાયામઃ શુભાર્થિના । (અગસ્ત્યઃ) । ત્વક્ ચર્મમાંસરુધિરમેદોમજ્જાસ્થિભિઃ કૃતાઃ । તથેન્દ્રિયકૃતા દોષા દહ્યન્તે પ્રાણનિગ્રહાત્ (અત્રિઃ) । યથા પર્વતધાતૂનાં દોષાન્દહતિ પાવકઃ । એવમન્તર્ગતં પાપં પ્રાણાયામેન દહ્યતે । (મ. નિ. તં.) ।

(૬)- જાનૂર્વોરન્તરે સમ્યક્ કૃત્વા પાદતલે ઉભે । ઋજુકાયઃ સમાસીનઃ સ્વસ્તિકાસનમુચ્યતે (યોગશાસ્ત્ર) આદિશબ્દાત્સુખાસનાદિ, "તત્ર સ્થિરસુખમાસનમ્" (યોગસૂત્ર) ।

(૭)- નિત્યદેવાર્ચને હોમે સન્ધ્યાયાં શ્રાદ્ધકર્મણિ । સ્નાને દાને તથા ધ્યાને પ્રાણાયામાસ્ત્રયઃ સ્મૃતા । (વ્યાસઃ) ।

(૮)- નીલપઙ્કજવિખ્યાતમાનીય નાભિમધ્યતઃ । મહાત્માનં ચતુર્બાહું સ કેયૂરં હરિં સ્મરેત્ (વૃ. પા. સં.) ।

(૯)- હૃત્પદ્મ કુમ્ભકે ધ્યાયેદ્ બ્રહ્માણં પઙ્કજાસનમ્ । રક્તેન્દીવરવર્ણાભં ચતુર્વક્ત્રં પિતામહમ્ । (વૃ. પા. સં.) ।

(૧૦)- રેચકે શઙ્કરં ધ્યાયેલ્લલાટસ્થં ત્રિશૂલિનમ્ । શુદ્ધસ્ફટિકસઙ્કાશં સંસારાર્ણવતારકમ્ ।

(૧૧)- એવં શ્વસનસંરોધે દેવતાત્રયચિન્તનાત્ । અગ્નિવાય્વમ્બુસંયોગાદન્તરં શુદ્ધ્યતે ત્રિભિઃ । (વૃ. પા. સં.) । ન પ્રાણો નાપ્યપાનેન વેગાદ્વાયું સમુત્સૃજેત્ । યેન સક્તું કરસ્થાંશ્ચ નિઃશ્વાસો નૈવ ચાલયેત્ । શનૈર્નાસાપુટાદ્વાયુમુત્સૃજેન્ન તુ વેગતઃ (યાજ્ઞ.) ॥

ઇતિ સન્ધ્યાધ્યાનં આવાહનં ચ સમ્પૂર્ણમ્ ।

## મન્ત્રાચમનમ્

અથ મન્ત્રાચમનમ્(૧) ॥

પ્રાતઃ સન્ધ્યાયામ્ - ૐ સૂર્યશ્ચમેતિ બ્રહ્મા ઋષિઃ પ્રકૃતિશ્છન્દઃ સૂર્યો દેવતા અપામુપસ્પર્શને વિનિયોગઃ । (તતઃ કરે ચુલુકોદકં ગૃહીત્વા) ૐ સૂર્યશ્ચ મા મન્યુશ્ચ મન્યુપતયશ્ચ મન્યુકૃતેભ્યઃ પાપેભ્યો રક્ષન્તાં યદ્રાત્ર્યા પાપમકાર્ષં મનસા વાચા હસ્તાભ્યાં પદ્ભ્યામુદરેણ શિશ્ના રાત્રિસ્તદવલુમ્પતુ યત્કિઞ્ચિદ્દુરિતં મયિ ઇદમહમાપોઽમૃતયોનૌ સૂર્યે જ્યોતિષિ જુહોમિ સ્વાહા (ઇત્યાચમ્ય(૨) પુનસ્તૂષ્ણીં દ્વિરાચામેત્ તતશ્ચ કરં ક્ષાલયેત્) ।

મધ્યાહ્નસન્ધ્યાયામ્ - ૐ આપઃ પુનન્ત્વિતિ વિષ્ણુરૃષિરનુષ્ટુપ્છન્દઃ આપો દેવતા અપામુપસ્પર્શને વિનિયોગઃ । ૐ આપઃ પુનન્તુ પૃથિવીં પૃથિવી પૂતા પુનાતુ મામ્, પુનન્તુ બ્રહ્મણસ્પતિર્બ્રહ્મપૂતા પુનાતુ મામ્, યદુચ્છિષ્ટમભોજ્યં ચ યદ્વા દુશ્ચરિતં મમ સર્વં પુનન્તુ મામાપોઽસતાં ચ પ્રતિગ્રહꣳ સ્વાહા ॥

સાયં સન્ધ્યાયામ્ - ૐ અગ્નિશ્ચમેતિ રુદ્રઋષિઃ પ્રકૃતિશ્છન્દોઽગ્નિર્દેવતા અપામુપસ્પર્શને વિનિયોગઃ ।

અગ્નિશ્ચ મા મન્યુશ્ચ મન્યુપતયશ્ચ મન્યુકૃતેભ્યઃ પાપેભ્યો રક્ષન્તાં યદહ્ના પાપમકાર્ષં મનસા વાચા હસ્તાભ્યાં પદ્ભ્યામુદરેણ શિશ્ના અહસ્તદવલુમ્પતુ યત્કિઞ્ચિદ્ દુરિતં મયિ ઇદમહમાપોઽમૃતયોનૌ સત્યે જ્યોતિષિ જુહોમિ સ્વાહા ॥

માર્જનમ્(૩) - ૐ આપોહિષ્ઠેત્યાદિ મન્ત્રસ્ય સિન્ધુદ્વીપઋષિર્ગાયત્રીછન્દઃ આપો દેવતા માર્જને વિનિયોગઃ (અથ જલાશયસ્થૈઃ તામ્રાદિપાત્રસ્થૈર્વામહસ્તૈર્વા જલૈઃ આપોહિષ્ઠેત્યાદિસપ્તભિઃ પદૈઃ શિરસિ અષ્ટમેન ભૂમૌ(૪) નવમેન પુનઃ શિરસિ દક્ષિણાનામિકયા માર્જયેત્ કુશલાભે કુશેનૈવ માર્જયેત્ ।) ૐ આપોહિષ્ઠામયો ભુવઃ । ૐ તાન ઊર્જે દધાત ન । ૐ મહેરણાય ચક્ષસે । ૐ યો વઃ શિવતમો રસઃ । ૐ તસ્ય ભાજયતે હ નઃ ૐ ઉશતીરિવ માતરઃ । ૐ તસ્માદરઙ્ગ મામવઃ । ૐ યસ્ય ક્ષયાય જિન્વથ । ૐ આપો જનયથા ચ નઃ ॥

આદાનપ્રક્ષેપઃ - ૐ સુમિત્રિયા દુર્મિત્રયા ઇતિ દ્વયોઃ પ્રજાપતિરૃષિઃ યજુશ્છન્દઃ આપો દેવતા આદાનપ્રક્ષેપે વિનિયોગઃ । ૐ સુમિત્ત્રિયા ન આપ ઓષધયઃ સન્તુ (ઇત્યનેન જલમાદાય) ૐ દુર્મિત્રિયાસ્તસ્મૈ સન્તુ યોઽસ્માન્દ્વેષ્ટિ યઞ્ચ વયં દ્વિષ્મઃ (ઇત્યનેન વામભાગે જન્તુહીનસ્થલે નિઃક્ષિપેત્) ॥

અવભૃથઃ - ૐ દ્રુપદાદિવેત્યસ્ય કોકિલો રાજપુત્ર ઋષિરનુષ્ટુપ્ છન્દઃ આપો દેવતા સૌત્રામણ્યવભૃથે વિનિયોગઃ । ( ૐકારેણ જલં વામહસ્તે ગૃહીત્વા તન્ન્યુબ્જેન દક્ષિણહસ્તેનાચ્છાદ્ય) ૐ દ્રુપદાદિવ મુમુચાનઃ સ્વિન્નઃ સ્નાતો મલાદિવ । પૂતં પવિત્રેણેવાજ્યમાપઃ શુન્ધન્તુ મૈનસઃ । (ઇતિ વારત્રયં પઠિત્વા તજ્જલં શિરસિ ક્ષિપેત્) ॥

અઘમર્ષણમ્ - ૐ અઘમર્ષણસૂક્તસ્યાઘમર્ષણ ઋષિરનુષ્ટુપ્ છન્દો ભાવવૃતો દેવતા અશ્વમેધાવભૃથે વિનિયોગઃ । (પુનશ્ચ જલમાદાય નાસાયાં યોજયિત્વા) । ૐ ઋતઞ્ચ સત્યં ચાભીદ્ધાત્તપસોઽધ્યજાયત તતો રાત્ર્યજાયત તતઃ સમુદ્રો અર્ણવઃ સમુદ્રાદર્ણવાદધિ સંવત્સરો અજાયત અહોરાત્રાણિ વિદધદ્વિશ્વસ્ય મિષતો વશી । સૂર્યાચન્દ્રમસૌ ધાતા યથાપૂર્વમકલ્પયદ્ દિવઞ્ચ પૃથિવીઞ્ચાન્તરિક્ષમથો સ્વઃ । (ઇત્યનેનાઘ્રાય દક્ષિણનાસયા પાપપુરુષં નિરસ્ય તજ્જલં નાવલોક્ય વામભાગે ક્ષિતૌ નિક્ષિપેત્) ।

ઉપસ્પર્શ - ૐ અન્તશ્ચરસીતિ તિરશ્ચીન ઋષિરનુષ્ટુપ્ છન્દઃ આપો દેવતા અપામુપસ્પર્શને વિનિયોગઃ । ૐ અન્તશ્ચરસિ ભૂતેષુ ગુહાયાં વિશ્વતોમુખઃ, ત્વં યજ્ઞસ્ત્વં વષટ્કાર આપો જ્યોતી રસોઽમૃતમ્ (ઇત્યાચમેત્) ॥

શ્રીસૂર્યાર્ઘ્યદાનમ્(૫) - ૐકારસ્ય બ્રહ્મા ઋષિર્ગાયત્રીછન્દોઽગ્નિર્દેવતા । મહાવ્યાહૃતીનાં પ્રજાપિતરૃષિઃ

ગાયત્ર્યુષ્ણિગનુષ્ટુભશ્છન્દાંસિ અગ્નિવાય્વાદિત્યા દેવતાઃ ગાયત્ર્યા વિશ્વામિત્ર ઋષિર્ગાયત્રીછન્દઃ સવિતા દેવતા શ્રીસૂર્યાર્ઘ્યદાને વિનિયોગઃ (સૂર્યાભિમુખસ્તિષ્ઠન્ ગન્ધાક્ષતપુષ્પયુક્તાનિ ત્રીણ્યર્ઘાણિ દદ્યાત્) । ૐ ભૂર્ભુવઃ સ્વઃ ૐ તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ ધિયો યો નઃ પ્રચોદયાત્, ૐ બ્રહ્મસ્વરૂપિણે શ્રીસૂર્યનારાયણાય નમઃ ઇદમર્ઘ્યં દત્તં ન મમ (ઇત્યર્ઘત્રયં દત્ત્વા દત્તાર્ઘ્યોદકેન ચક્ષુઃશ્રોત્રસ્પર્શનઞ્ચ કુર્યાત્)(૬) કાલાતિક્રમે સતિ ચતુર્થં પ્રાયશ્ચિત્તાર્ઘ્યં દેયમ્ ।

શ્રીસૂર્યોપસ્થાનમ્ - (ઉત્થાય ભૂમ્યલગ્નગુલ્ફતલભાગો વા ભૂમ્યલગ્નચરણાર્ધભાગો વા સ્વસ્તિકાકારપાણિઃ(૭) સૂર્યાભિમુખઃ સૂર્યોપસ્થાનં કુર્યાત્) - ૐ ઉદ્વયમિત્યસ્ય પ્રસ્કણ્વ ઋષિઃ અનુષ્ટુપ્ છન્દઃ સૂર્યો દેવતા સૂર્યોપસ્થાને વિનિયોગઃ । ૐ ઉદુત્યમિત્યસ્ય હિરણ્યસ્તૂપ ઋષિર્ગાયત્રી છન્દઃ સૂર્યો દેવતા સૂર્યોપસ્થાને વિનિયોગઃ । ૐ ચિત્રમિત્યસ્ય કૌત્સ ઋષિસ્ત્રિષ્ટુપ્ છન્દઃ સૂર્યો દેવતા સૂર્યોપસ્થાને વિનિયોગઃ । ૐ તચ્ચક્ષુરિતિ દધ્યઙ્ઙાથર્વણ ઋષિરક્ષરાતીતપુર ઉષ્ણિક્ છન્દઃ સૂર્યો દેવતા સૂર્યોપસ્થાને વિનિયોગઃ । ૐ ઉદ્વયં તમસસ્પરિસ્વઃ પશ્યન્ત ઉત્તરમ્, દેવં દેવત્રા સૂર્યમગન્મ જ્યોતિરુત્તમમ્ । ૐ ઉદુત્યં જાતવેદસં દેવં વહન્તિ કેતવઃ દૃશે વિશ્વાય સૂર્યમ્ । ૐ ચિત્રં દેવાનામુદગાદનીકં ચક્ષુર્મિત્રસ્ય વરુણસ્યાગ્ને આપ્રાદ્યાવાપૃથિવી અન્તરિક્ષઁ સૂર્ય આત્મા જગતસ્તસ્થુષશ્ચ । ૐ તચ્ચક્ષુર્દેવહિતં પુરસ્તાચ્છુક્રમુચ્ચરત્ પશ્યેમ શરદઃ શતં જીવેમ શરદઃ શતઁ શ◌ૃણુયામ શરદઃ શતં પ્રબ્રવામ શરદઃ શતમદીનાઃ શ્યામ શરદઃ શતં ભૂયશ્ચ શરદઃ શતાત્ ॥

અથ સન્ધ્યાપ્રયોગાન્તરે મન્ત્રાચમનમ્ ટિપ્પણિકા ।

Footnotes for mantrAchamanam in sandhyAprayogaH

(૧)- કાંસ્યેનાયસપાત્રેણ ત્રપુસીસકપિત્તલૈઃ । આચાન્તઃ શતકૃત્વોઽપિ ન કદાચન શુદ્ધ્યતિ (આહ્નિકકારિકા) ।

(૨)- ત્રિવૃદાચમનમ્ ।

(૩)- માર્જનં તર્પણં શ્રાદ્ધં ન કુર્યાદ્વારિધારયા । કુર્યાચ્ચેદ્વારિધારાભિસ્તત્સર્વં નિષ્ફલં ભવેત । (સ. યા.) ॥

(૪)- ભૂમિશબ્દેન ચરણાવાકાશં હૃદયં સ્મૃતમ્ । શિરસ્યેવ શિરઃ શબ્દો માર્જનજ્ઞૈરુદાહૃતઃ ॥

(૫)- કરાભ્યાં તોયમામન્ત્ર્ય ગાયત્ર્યા ચાભિમન્ત્રિતમ્ । આદિત્યાભિમુખસ્તિષ્ઠંસ્ત્રિઃ ક્ષિપેત્સન્ધ્યયોઃ દ્વયોઃ । મધ્યાહ્ને તુ સકૃચ્ચૈવ ક્ષેપણીયં દ્વિજાદિભિઃ ॥ ઈષન્નમ્રઃ પ્રભાતે તુ મધ્યાહ્ને ઋજુસંસ્થિતઃ । ઉપવિષ્ટસ્તુ સાયાહ્ને ભૂમાવર્ઘ્યં વિનિક્ષિપેત્ (યોગીશઃ) । અપ્રવાહોદકસ્નાનં વિપ્રપાદાવનેજનમ્ । ગાયત્રીજપમર્ઘ્યઞ્ચ આદિત્યાભિમુખશ્ચરેત્ । (સ્મૃ.) ॥ નાર્ઘ્યઞ્જલેક્ષિપેદિતિશિષ્ટા ।

(૬)- કાલાતિક્રમે સતિ ૐ આકૃષ્ણેન રજસા વર્તમાનો નિવેશયન્ન મૃતમ્મર્ત્યઞ્ચ હિરણ્મયેન સવિતા રથેન દેવો યાતિ ભુવનાનિ પશ્યન્ । બ્રહ્મસ્વરૂપિણે શ્રીસૂર્યનારાયણાય નમઃ પ્રાયશ્ચિત્તાર્થં ઇદમર્ઘ્યં દત્તં ન મમ । અનેન પ્રકારેણ ચતુર્થાર્ઘ્યં દદ્યાત્ ॥

(૭)- પ્રાતસ્તુ સ્વસ્તિકાકારૌ મધ્યાહ્ને તૂર્ધ્વબાહુકૌ । સાયં મુકુલિતાકારૌ ઉપસ્થાને કરૌ સ્મૃતૌ ।

ઇતિ મન્ત્રાચમનમ્ ।

## ગાયત્ર્યાવાહનમ્

વૈદિકાવાહનમ્ - ૐ તેજોઽસીતિ દેવા ઋષયો ગાયત્રી છન્દઃ શુક્રં દૈવતં ગાયત્ર્યાવાહને વિનિયોગઃ । (નમસ્કારમુદ્રાં કૃત્વા) ૐ તેજોઽસિ શુક્રમસ્યમૃતમસિ ધામનામાસિ પ્રિયં દેવાનામનાધૃષ્ટં દેવયજનમસિ ॥

લૌકિકાવાહનમ્ - ૐ આગચ્છ વરદે દેવિ જપે મે સન્નિધૌ ભવ । ગાયન્તં ત્રાયસે યસ્માત્ ગાયત્રી ત્વં તતઃ સ્મૃતા । (ઇત્યાવાહ્ય)

ગાયત્ર્યુપસ્થાનમ્ - ગાયત્ર્યસીતિ વિમલઋષિઃ પઙ્ક્તિશ્છન્દઃ પરમાત્મા દેવતા ગાયત્ર્યુપસ્થાને વિનિયોગઃ (ઉપસ્થાનમુદ્રાં કૃત્વા) - ૐ ગાયત્ર્યસ્યેકપદી દ્વિપદી ત્રિપદી ચતુષ્પદ્યપદસિ નહિ પદ્યસે । નમસ્તે તુરીયાય દર્શતાય પદાય પરો રજસેઽસાવદો મા પ્રાપત્ (ઇત્યુપસ્થાય ધ્યાનમુદ્રાં કૃત્વા ધ્યાયેત્) ।

ગાયત્રીધ્યાનમ્ - ૐ શ્વેતવર્ણા સમુદ્દિષ્ટા કૌશેયવસના તથા । શ્વેતૈર્વિલેપનૈઃ પુષ્પૈરલઙ્કારૈશ્ચ ભૂષિતા । આદિત્યમણ્ડલસ્થા ચ બ્રહ્મલોકગતાથ વા । અક્ષસૂત્રધરા દેવી પદ્માસનગતા શુભા । (ઇતિ ધ્યાત્વા)

ગાયત્રીજપઃ(૧) - ૐકારસ્ય બ્રહ્મા ઋષિર્ગાયત્રી છન્દોઽગ્નિર્દેવતા શુક્લો વર્ણઃ જપે વિનિયોગઃ । ૐ ત્રિવ્યાહૃતીનાં પ્રજાપતિરૃષિર્ગાયત્ર્યુષ્ણિગનુષ્ટુભશ્છન્દાંસ્યગ્નિવાય્વાદિત્યા દેવતા જપે વિનિયોગઃ । ૐ ગાયત્ર્યા વિશ્વામિત્ર-ઋષિર્ગાયત્રી છન્દઃ સવિતા દેવતા શુક્લો વર્ણઃ અગ્નિર્મુખં બ્રહ્મા શિરો વિષ્ણુહૃદયં રુદ્ર કવચં પરમાત્મા શરીરં સાઙ્ખ્યાયનષટ્સ્વરા સરસ્વતી જિહ્વા પિઙ્ગાક્ષી ત્રિપદા ગાયત્રી સવિતુઃ પ્રીતયે અષ્ટોત્તરશતસઙ્ખ્યયા(૨) જપે વિનિયોગઃ । (ઇતિ વિનિયોગં કૃત્વા વસ્ત્રાચ્છાદિતાં(૩) જપમાલાં ગોમુખીં વા નાભિદેશે(૪) ધૃત્વા) -

ગાયત્રીમન્ત્રઃ - ૐ ભૂર્ભુવઃ સ્વઃ ૐ તત્સવિતુર્વરેણ્યં(૫) ભર્ગો દેવસ્ય ધીમહિ ધિયો યો નઃ પ્રચોદયાત્ (એવં પ્રવાલ-રુદ્રાક્ષ-સ્ફટિકમૌક્તિકાદિનિર્મિતયા માલયા(૬) કરમાલયા(૭) વા મન્ત્રાર્થં ધ્યાયમન્મૌની સૂર્યાભિમુખસ્તિષ્ઠન્(૮) આમણ્ડલદર્શનાદ્યથા(૯) શક્તિ જપેત્ તતઃ કરસમ્પુટં કૃત્વા ૐ દેવાગાતુ વિદોગાતુ વિત્ત્વાગાતુ મિતમનસસ્પત ઇમં દેવયજ્ઞꣳ સ્વાહા વાતેધાઃ (ઇતિ પઠિત્વા દક્ષિણકરે જલમાદાય) ।

જપાર્પણમ્ - અનેન પ્રાતઃ(૧૦) સન્ધ્યાઙ્ગભૂતેન અમુકસઙ્ખ્યાકેન ગાયત્રીમન્ત્રજપાખ્યેન(૧૨) કર્મણા શ્રીભગવાન્ બ્રહ્મસ્વરૂપી(૧૩) સવિતા પ્રીયતાં નમઃ । (ઇતિ જલં ક્ષિપેત્) ।

પ્રાર્થના - યદક્ષરપદભ્રષ્ટં માત્રાહીનન્તુ યદ્ભવેત્ । તત્સર્વં ક્ષમ્યતાં દેવિ પ્રસીદ પરમેશ્વરિ । (ઇતિ પ્રણિપત્ય) ।

શ્રીસૂર્યપ્રદક્ષિણા(૧૪) - ૐ યાનિ કાનિ ચ પાપાનિ જન્માન્તરકૃતાનિ ચ । તાનિ તાનિ પ્રણશ્યન્તિ પ્રદક્ષિણપદેપદે ॥ (ઇતિ શ્રીસૂર્યં પ્રદક્ષિણીકૃત્ય પ્રણમેત્) ।

શ્રીસૂર્યપ્રણામઃ - ૐ એકચક્ર ઇત્યસ્ય નારાયણ ઋષિઃ ઉષ્ણિક્ છન્દઃ શ્રીસૂર્યો દેવતા સૂર્યનમસ્કારે વિનિયોગઃ । (ઇતિ વિનિયોગં કૃત્વા હસ્તૌ સમાનીય) ૐ એકચક્રો રથો યસ્ય દિવ્યઃ કનકભૂષિતઃ । સ મે ભવતુ સુપ્રીતઃ પદ્મહસ્તો દિવાકરઃ । (ઇતિ નત્વા સૂર્યાભિમુખસ્તિષ્ઠન્ ઘણ્ટાવત્-રણરણત્સ્વરેણ પ્રણવોચ્ચારણં કુર્યાત્) ।

સન્ધ્યાવિસર્જનમ્(૧૫) - સ્તુતા મયા વરદા વેદમાતા પ્રચોદયન્તાં પાવમાની દ્વિજાનામ્ । આયુઃ પ્રાણં પ્રજાં પશું કીર્તિં દ્રવિણં બ્રહ્મવર્ચસં મહ્યં દત્ત્વા વ્રજત બ્રહ્મલોકમ્ । ૐ ઉત્તરે શિખરે ઇત્યસ્ય કશ્યપ ઋષિરનુષ્ટુપ્ છન્દઃ સન્ધ્યા દેવતા સન્ધ્યાવિસર્જને વિનિયોગઃ । ૐ ઉત્તરે શિખરે દેવિ ભૂમ્યાં પર્વતમૂર્ધનિ । બ્રાહ્મણેભ્યોઽભ્યનુજ્ઞાતા ગચ્છ દેવિ યથાસુખમ્ । (ઇત્યનેન સંહારમુદ્રયા(૧૬) સન્ધ્યાં વિસર્જયેત્) ॥

દેવબ્રાહ્મણનમસ્કારઃ - (નમસ્કારમુદ્રાં કૃત્વા) - ॐ તત્સત્ । ॐ સન્ધ્યાયૈ નમઃ । ॐ ગાયત્ર્યૈ નમઃ । ॐ સાવિત્ર્યૈ નમઃ । ॐ સરસ્વત્યૈ નમઃ । ॐ સર્વેભ્યો દેવતાભ્યો નમઃ । ॐ આસત્યલોકાત્પાતાલાદાલોકાલોકપર્વતાત્ । યે સન્તિ બ્રાહ્મણા દેવાસ્તેભ્યો નિત્યં નમો નમઃ ।
યજ્ઞાત્મને નમસ્કારઃ - ચતુર્ભિશ્ચ(૧૭) ચતુર્ભિશ્ચ દ્વાભ્યાં પઞ્ચભિરેવ ચ । હૂયતે ચ પુનર્દ્વાભ્યાં તસ્મૈ યજ્ઞાત્મને નમઃ । (ઇતિ નમસ્કૃત્ય) ॥

ઈશ્વરસ્તુતિઃ - ॐ આકાશાત્પતિતં તોયં યથા ગચ્છતિ સાગરમ્ । સર્વદેવનમસ્કારઃ કેશવં પ્રતિ ગચ્છતિ ॥ પ્રમાદાત્કુર્વતાં કર્મ પ્રચ્યવેતાધ્વરેષુ યત્ । સ્મરણાદેવ તદ્વિષ્ણોઃ સમ્પૂર્ણં સ્યાદિતિ શ્રુતિઃ ॥ યસ્ય સ્મૃત્યા ચ નામોક્ત્યા તપોયજ્ઞક્રિયાદિષુ । ન્યૂનં સમ્પૂર્ણતાં યાતિ સદ્યો વન્દે તમચ્યુતમ્ ।
નમસ્કૃતિપૂર્વકશુભકામના - (કરૌ બદ્ધ્વા પ્રણમેત્) ॐ નમો બ્રહ્મણે નમસ્તે વાયો ત્વમેવ પ્રત્યક્ષં બ્રહ્માસિ, ત્વામેવ પ્રત્યક્ષં બ્રહ્મ વદિષ્યામિ ઋતં વદિષ્યામિ સત્યં વદિષ્યામિ તન્મામવતુ તદ્વક્તારમવતુ અવતુ માં અવતુ વક્તારમ્ ॥ મા મતિઃ પરદારેષુ પરદ્રવ્યેષુ મા મતિઃ । પરાપવાદિની જિહ્વા મા ભૂજ્જન્મનિ જન્મનિ । સર્વે ભવન્તુ સુખિનઃ સર્વે સન્તુ નિરામયાઃ સર્વે ભદ્રાણિ પશ્યન્તુ મા કશ્ચિત્ દુઃખભાગ્ ભવેત્ । અનાયાસેન મરણં વિના દૈન્યેન જીવનમ્ । દેહાન્તે પરમં સ્થાનં દેહિ મે પરમેશ્વર ॥ (ઇતિ સમ્પ્રાર્થ્ય) ।
અર્પણમ્ - (જલં ગૃહીત્વા) । ॐ કાયેન વાચા મનસેન્દ્રિયૈર્વા બુદ્ધ્યાત્મના વા પ્રકૃતેઃ સ્વભાવાત્ । કરોમિ યદ્યત્સકલં પરસ્મૈ નારાયણાયેતિ સમર્પયામિ ॥ અનેન પ્રાતઃ(૧૮) સન્ધ્યોપાસનાખ્યેન કર્મણા ભગવાન્ બ્રહ્મસ્વરૂપો(૧૯) પરમેશ્વરઃ પ્રીયતાં નમઃ (ઇતિ જલં ક્ષિપેત્) । તતો દ્વિરાચમનમ્(૨૦) । ॐ ઋગ્વેદાય સ્વાહા, ॐ યજુર્વેદાય સ્વાહા, ॐ સામવેદાય સ્વાહા ।
હસ્તપ્રક્ષાલનમ્ - ॐ અથર્વવેદાય નમઃ । ॐ વિષ્ણવે નમઃ । ॐ વિષ્ણવે નમઃ । ॐ વિષ્ણવે નમઃ । આસનાધઃ જલં ક્ષિપ્ત્વા ॐ શક્રાય નમઃ ઇત્યુચ્ચાર્ય્ય સ્વમસ્તકે(૨૧) મૃદં ધૃત્વા સન્ધ્યાવશિષ્ટજલં(૨૨) ક્ષિપેત્ ।
॥ ઇતિ સન્ધ્યાપ્રયોગઃ(૨૩) ॥

અથ સન્ધ્યાપ્રયોગાન્તરે ગાયત્ર્યાવાહનસ્ય ટિપ્પણિકા ।

Footnotes for gAyatryAvAhanam in sandhyAprayogaH

(૧)- મનોમધ્યે સ્થિતો મન્ત્રો મન્ત્રમધ્યે સ્થિતં મનઃ । મનોમન્ત્રસમાયુક્તં એતદ્ધિ જપલક્ષણમ્ ॥ કદાચિદપિ નો વિદ્વાન્ ગાયત્રીમુદકે જપેત્ । ગાયત્ર્યગ્નિમુખી પ્રોક્તા તસ્માદુત્થાય તાં જપેત્ ॥ (ગોભિલઃ)। અઙ્ગુષ્ઠાગ્રેણ યજ્જપ્તં યજ્જપ્તં મેરુલઙ્ઘનાત્ । અસઙ્ખ્યાતં તથા જપ્તં તત્સર્વં નિષ્ફલં ભવેત્ ॥ (યમઃ) । (વિશેષજપનિયમાસ્તુ જપવિધેષ્ટિપ્પણ્યામગ્રે દ્રષ્ટવ્યાઃ) ॥

(૨)- અત્ર દશ અષ્ટાવિંશતિ, અષ્ટોત્તરશત, સહસ્ર ઇત્યેષાં મધ્યે અનુષ્ઠેયં પદં યોજ્યં

(૩)- વસ્ત્રેણાચ્છાદ્ય તુ કરં દક્ષિણં યઃ સદા જપેત્ । તસ્ય સ્યાત્સફલં જાપ્યં તદ્ધીનમફલં સ્મૃતમ્ । અતએવ જપાર્થં તુ ગોમુખી ધ્રિયતે જનૈઃ । (વ્યાસઃ) ॥

(૪)- પ્રાતર્નાભૌ કરં કૃત્વા મધ્યાહ્ને હૃદિ સંસ્થિતમ્ । સાયં જપેચ્ચ નાસાગ્રે હ્યેતજ્જપવિધિઃ સ્મૃતઃ ॥

(૫)- પાઠકાલે વરેણ્યં સ્યાજ્જપકાલે વરેણિયમ્ (ઇતિ શિક્ષાવચને પૈઠીનસિનોક્તમ્) ।

(૬)- અષ્ટશતં ચતુઃપઞ્ચાશત્ સપ્તવિંશતિર્વા માલામણયઃ । (ધ. સિ. સા.) ॥

(૭)- કરમાલાપ્રકારઃ - પર્વભિસ્તુ જપેદ્દેવીં માલા કામ્યજપે સ્મૃતા । ગાયત્રી વેદમૂલા સ્યાદ્વેદઃ પર્વસુ ગીયતે । આરભ્યાનામિકામધ્યે પર્વાણ્યુક્તાન્યનુક્રમાત્ । તર્જનીમૂલપર્યન્તં જપેદ્દશસુ પર્વસુ । મધ્યમાઙ્ગુલિમૂલે તુ યત્પર્વન્દ્વિતયં ભવેત્ । તત્તુ મેરું વિજાનીયાજ્જપે તન્નાતિલઙ્ઘયેત્ । (ગા. ક.) ।

(૮)- પ્રાતર્મન્ધ્યાહ્નયોસ્તિષ્ઠન્ સાયમાસીન એવ ચ ।

(૯)- સહસ્રપરમાં દેવીં શતમધ્યાં દશાવરામ્ । ગાયત્રીં યઃ પઠેદ્વિપ્રો ન સ પાપેન લિપ્યતે । (લ. અ. સ.) ॥ અન્યચ્ચ - અષ્ટોત્તરશતં નિત્યમષ્ટાવિંશતિરેવ વા । વિધિના દશકં વાપિ ત્રિકાલેષુ જપેદ્ બુધઃ । (વ્યા.) સહસ્રકૃત્વસ્ત્વભ્યસ્ય બહિરેતત્ત્રિકં દ્વિજઃ । મહતોઽપ્યેનસો માસાત્ ત્વચેવાહિર્વિમુચ્યતે । (મનુઃ) । ઋષયો દીર્ઘસન્ધ્યત્વાદ્દીર્ઘમાયુરવાપ્નુયુઃ । પ્રજા યશશ્ચ કીર્તિશ્ચ બ્રહ્મવર્ચસમેવ ચ, ઇતિ મનુનાઽપિ ગાયત્રીજપ એવ સન્ધ્યાપદં પ્રયુક્તં ગાયત્રીજપેન દીર્ઘાયુર્ભવતીતિ ॥

(૧૦)- મધ્યાહ્ને - મધ્યાહ્નમ્, સાયઙ્કાલે - સાયં ઇત્યૂહઃ કાર્યઃ ॥

(૧૧)- અત્ર દશ, અષ્ટાવિંશતિ, અષ્ટોત્તરશત, સહસ્ર ઇત્યેષાં મધ્યે અનુષ્ઠિતં પદં યોજ્યમ્ ।

(૧૨)- યત્કૃતે દશભિર્વર્ષૈસ્ત્રેતાયાં હાયનેન યત્ । દ્વાપરે યત્તુ માસેન અહોરાત્રેણ તત્કલૌ ॥ તપસો બ્રહ્મચર્યસ્ય જપાદેશ્ચ ફલં દ્વિજાઃ । પ્રાપ્નોતિ પુરુષસ્તેન કલિમાપ્નોતિ માનવઃ ॥ (વિષ્ણુપુરાણ) ।

(૧૩)- મધ્યાહ્નસાયં-સન્ધ્યયોઃ બ્રહ્મ ઇત્યસ્ય સ્થાને ક્રમેણ રુદ્રવિષ્ણુ ઇત્યૂહઃ કાર્યઃ ।

(૧૪)- એકાં ચણ્ડ્યાં રવૌ સપ્ત તિસ્રો દદ્યાદ્વિનાયકે । ચતસ્રો વિષ્ણવે દદ્યાચ્છિવે સાર્દ્ધં પ્રદક્ષિણાઃ । (લિઙ્ગાર્ચનચન્દ્રિકા) ॥ બ્રાહ્મણાનામપિ ચતસ્ર એવ પ્રદક્ષિણાસ્તેષામપિ હરિરૂપતાયાઃ શાસ્ત્રનિરૂપિતત્વાત્ ॥

(૧૫)- ન સ દ્વિજો યો ન કરોતિ સન્ધ્યાં, સન્ધ્યા ન સા યા મનસો વિશુદ્ધિમ્ । શુદ્ધિર્ન સા યત્ર ન સત્યમસ્તિ સત્યન્ન તન્નિર્ભયતા ન યત્ર ।

(૧૬)- કરપૃષ્ઠભાગૌ સંસ્પૃષ્ટૌ કૃત્વા પરસ્પરાકુઞ્ચિતાઙ્ગુલિકૌ અધોમાર્ગેણ ભ્રામયેદેષા સંહારમુદ્રા । (મન્ત્રસારે) ॥

(૧૭)- આશ્રાવયેતિ ચતુરક્ષરમ્ । અસ્તુ શ્રૌષડિતિ ચતુક્ષરમ્ । યજેતિ દ્વ્યક્ષરમ્ । યજામહે ઇતિ પઞ્ચાક્ષરમ્ । દ્વ્યક્ષરો વષટ્કાર ઇતિ સપ્તદશભિરક્ષરૈર્યો હૂયતે તસ્મૈ યજ્ઞાત્મને નમઃ ॥

(૧૮)- મધ્યાહ્ને - મધ્યાહ્નમ્, સાયઙ્કાલે - સાયં ઇત્યૂહઃ કાર્યઃ ।

(૧૯)- મધ્યાહ્ન - સાયં સન્ધ્યયોઃ બ્રહ્મસ્વરૂપી ઇત્યસ્ય સ્થાને ક્રમેણ રુદ્રવિષ્ણુ ઇતિ યોજનીયમ્ ।

(૨૦)- હોમે ભોજનકાલે ચ સન્ધ્યયોરુભયોરપિ । આચાન્તઃ પુનરાચામેદન્યત્રાપિ સકૃત્સકૃત્ । દ્વિરાચમ્ય તતઃ શુદ્ધઃ સ્મૃત્વા વિષ્ણું સનાતનમ્ ॥

(૨૧)- અપ્રોક્ષિતજપસ્થાનાચ્છક્રો હરતિ તજ્જપમ્ । તન્મૃદા-લક્ષ્મ કુર્વીત લલાટે તિલકાકૃતિ ॥

(૨૨)- પાદશેષં પીતશેષં સન્ધ્યાશેષં તથૈવ ચ । શુનો મૂત્રસમં તોયં પીત્વા ચાન્દ્રાયણં ચરેત્ ॥

(૨૩)- સન્ધ્યાફલમ્ - સન્ધ્યામુપાસતે યે તુ સતતં શંસિતવ્રતાઃ । વિધૂતપાપાસ્તે યાન્તિ બ્રહ્મલોકં સનાતનમ્ (અત્રિઃ) । દિવા વા યદિ વા રાત્રૌ યદજ્ઞાનકૃતં ભવેત્ । ત્રિકાલસન્ધ્યાકરણાત્તત્સર્વં વિપ્રણશ્યતિ । (યાજ્ઞ.) ॥

સન્ધ્યાऽકરણે દોષઃ - નાનુતિષ્ઠતિ યઃ પૂર્વાં નોપાસ્તે યશ્ચ પશ્ચિમામ્ । સ શૂદ્રવદ્બહિષ્કાર્યઃ સર્વસ્માદ્ દ્વિજકર્મણઃ ॥ સન્ધ્યાહીનોऽશુચિર્નિત્યમનર્હઃ સર્વકર્મસુ । યદન્યત્કુરુતે કર્મ ન તસ્ય ફલભાગ્ભવેત્ । (દક્ષઃ) । સ્નાનં સન્ધ્યાં ત્યજન્વિપ્રઃ સપ્તાહાચ્છૂદ્રતાં બ્રજેત્ (કાત્યાયનઃ) ॥ દોષાપવાદઃ - દેવાગ્નિદ્વિજવિદ્યાનાં કાર્યે મહતિ સંસ્થિતે । સન્ધ્યાહાનૌ ન દોષોऽસ્તિ યતસ્તત્પુણ્યસાધનમ્ ॥ સન્ધ્યાત્યાગે પ્રાયશ્ચિત્તં - સર્વથા સન્ધ્યાલોપે પ્રતિ સન્ધ્યમેકોપવાસોऽવૃતમષ્ટોત્તરશતસહસ્રં વા ગાયત્રીજપઃ । અત્યશક્તૌ સત્યાં સન્ધ્યાલોપે શતગાયત્રીજપઃ દ્વ્યહં ત્ર્યહં લોપે તદાવૃત્તિઃ તતઃ પરં કૃચ્છ્રાદિ કલ્પ્યમ્ । (ધ. સિં. સા.) । રાષ્ટ્રભઙ્ગે નૃપક્રોધે રોગાર્ત્તે સૂતકેऽપિ ચ । સન્ધ્યાવન્દનવિચ્છિત્તિર્ન દોષાય કદાચન । (જમદગ્નિઃ) ॥

ઇતિ ગાયત્ર્યાવાહનં સમ્પૂર્ણમ્ ।

ઇતિ સન્ધ્યાપ્રયોગઃ સમ્પૂર્ણઃ ।

Proofread by Paresh Panditrao, NA, KS Sheshadri Sharma

---

*Sandhya Prayogah*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*